# Shri Sharadesha TrishatI Namavali

# श्रीशारदेशत्रिशतीनामावलिः

## Document Information

Text title : Sharadesha Trishati Namavali 301 Names

File name : shAradeshatrishatinAmAvalI.itx

Category : trishatI, ganesha, shatInAmAvalI, nAmAvalI

Location : doc_ganesha

Proofread by : PSA Easwara

Description-comments : See corresponding trishati stotram

Source : Vinayakatantra

Latest update : May 15, 2021

Send corrections to : Sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

May 15, 2021

*sanskritdocuments.org*

# श्रीशारदेशत्रिशतीनामावलिः

ॐ ॐकारवाच्याय नमः । ॐकाराय । ॐकारमुखराजिताय ।
ॐकारमातृगाय । ॐकारशून्यपदसंस्थिताय । ॐकारबिन्दुगाय ।
ॐकारनादकारणाय । ॐकारमात्राजनकाय । ॐकारपूर्णविग्रहाय ।
ॐकारचक्रमध्यस्थाय । ॐकारशक्तिनायकाय । श्रीङ्काराय ।
श्रीधराय । श्रीदाय । श्रीपतये । श्रीनिकेतनाय । श्रीनिवासाय ।
श्रीधराय (२) श्रीमते । श्रीङ्कारदेवपूजिताय नमः । २०

ॐ श्रीङ्कारदेवपूर्वाङ्गाय नमः । श्रीङ्कारयुग्मसेविताय ।
ह्रीङ्कारलक्ष्याय । ह्रीङ्कारशक्तीशाय । ह्रींमनुप्रियाय ।
ह्रीङ्कारमायाजनकाय । ह्रीङ्कारशक्तिपूजिताय ।
ह्रीङ्कारेशदक्षिणाङ्गाय । ह्रीङ्कारमनुतोषिताय ।
ह्रीङ्कारजपसुप्रीताय । ह्रीङ्कारशक्तिलोकगाय । ह्रीङ्कारशक्तिमलजाय ।
ह्रीङ्कारशक्तिनन्दनाय । क्लीङ्कारमनुसंवेद्याय ।
क्लीङ्कारमनुतोषिताय । क्लीङ्कारेशपश्चिमाङ्गाय ।
क्लीङ्कारदेवसेविताय । क्लीङ्कारेण विश्वमोहकराय । क्लीङ्कारकारणाय ।
क्लीङ्कारेण वश्यदात्रे नमः । ४०

ॐ क्लीङ्कारेश्वरपूजिताय नमः । क्लीङ्कारशक्तिपतिदाय ।
क्लीङ्कारशक्तिहर्षदाय । क्लीङ्कारेण विश्वस्त्रष्ट्रे ।
क्लीङ्कारमयविश्वगाय । क्लीङ्कारेण विश्ववृद्धिकराय ।
ऐङ्कारपीठगाय । ऐङ्कारजपसुप्रीताय । ऐङ्कारदेववन्दिताय ।
ऐङ्कारेश्वरवामाङ्गाय । ऐङ्कारशक्तिनायकाय । ऐङ्कारशक्तिजनकाय ।
ऐङ्कारेण विभूतिदाय । ऐङ्कारमयवेदेड्याय । ऐङ्कारशब्दकारणाय ।
गम्बीजाय । गम्बीजदेहाय । गम्बीजात्मने । गंस्थितिप्रदाय ।
गङ्कारमन्त्रसंवेद्याय नमः । ६०

ॐ गङ्कारेण गतिप्रदाय नमः । गङ्कारेण विश्वस्त्रष्ट्रे ।

गङ्कारेण सुमुक्तिदाय । गङ्कारेण कामदात्रे । गङ्कारेण अर्थदायकाय ।
गङ्कारेण ब्रह्मभूयदायकाय । गणनायकाय । गणेश्वराय । गणक्रीडाय ।
गणनाथाय । गणाधिपाय । गणमूर्तये । गणपतये । गणत्रात्रे ।
गणञ्जयाय । गणज्येष्ठाय । गणश्रेष्ठाय । गणगोप्त्रे ।
गणप्रथाय । नरदेहाय नमः । ८०

ॐ नागमुखाय नमः । नारायणसमर्चिताय । नारायणश्रीपूर्वाङ्गाय ।
नादमध्येप्रतिष्ठिताय । नन्द्याय । नन्दीप्रियाय । नादजनकाय ।
नटनप्रियाय । नगराजसुतासूनवे । नटराजसुपूजिताय । परमात्मने ।
परन्धाम्ने । पशुपाशविमोचकाय । परञ्ज्योतिषे । पराकाशाय ।
पुराणपुरुषोत्तमाय । पुरुषाय । प्रणवाकाराय । पुरुषातीतविग्रहाय ।
पद्मनाभसुतानाथाय नमः । १००

ॐ पद्मनाभसमर्चिताय नमः । तत्त्वानाम्परमन्तत्त्वाय ।
तत्त्वम्पदनिरूपिताय । तत्त्वातीताय । तत्त्वमयाय ।
तत्त्वाष्टकसुसंस्थिताय । तत्त्वमस्याकृतिधराय ।
तत्त्वमस्यार्थबोधकाय । तारकान्तरसंस्थानाय । तारकाय ।
तारकाननाय । तारकासुरसंहर्त्रे । तारकान्तकपूर्वजाय । यज्ञाय ।
यज्ञपतये । यज्ञफलदाय । यज्ञरक्षकाय । यज्ञमूर्तये ।
यज्ञभोक्त्रे । यज्ञेशानवरप्रदाय नमः । १२०

ॐ यज्ञकर्त्रे नमः । यज्ञधर्त्रे । यज्ञहर्त्रे । यमीश्वराय ।
विनायकाय । विघ्नराजाय । वैनायकप्रवालकाय । विघ्नहर्त्रे ।
विघ्नकर्त्रे । विश्वाधाराय । विराट्पतये । वागीश्वरीपतये ।
वाणीनायकाय । वामनार्चिताय । रक्षाकराय । राक्षसघ्नाय । रमेशाय ।
रावणार्चिताय । रमाप्रियाय । रमेशानपूजिताय नमः । १४०

ॐ राधिकार्चिताय नमः । रमारमेशपूर्वाङ्गाय ।
राकाचन्द्रसमप्रभाय । रत्नगर्भाय । रत्नदात्रे । रक्ताय ।
राज्यसुखप्रदाय । विश्वनाथाय । विराण्णाथाय । विश्वाय ।
विष्णुप्रपूजिताय । विश्वातीताय । विश्वमयाय । वीतिहोत्रसमर्चिताय ।
विश्वम्भराय । विश्वपात्रे । विश्वधर्त्रे । विमानगाय ।
रामार्चिताङ्घ्रियुगलाय । रघुनाथवरप्रदाय नमः । १६०

ॐ रामप्रियाय नमः । रामनाथाय । रामवंशप्रपालकाय ।

रामेश्वरक्षेत्रवासिने । रामसेतुफलप्रदाय । रामभक्तिसुसन्तुष्टाय ।
रामाभीष्टफलप्रदाय । रामविघ्नप्रशमनाय । रामाय । सिद्धिदायकाय ।
दक्षयज्ञप्रमथनाय । दैत्यवारणधारणाय । द्वैमातुराय ।
द्विवदनाय । द्वन्द्वातीताय । द्वयातिगाय । द्विपास्याय । देवदेवेशाय ।
देवेन्द्रपरिपूजिताय । दहराकाशमध्यस्थाय नमः । १८०

ॐ देवदानवमोहनाय नमः । वामारामाय । वेदवेद्याय । वैद्यनाथाय ।
वरेण्यजाय । वासुदेवसमाराध्याय । वासुदेवेष्टदायकाय ।
विभावसुमण्डलस्थाय । विभावसुवरप्रदाय । वसुधारेशवरदाय ।
वराय । वसुमतीश्वराय । दयावते । दिव्यविभवाय । दण्डभृते ।
दण्डनायकाय । दाडिमीकुसुमप्रख्याय । दाडिमीफलभक्षकाय ।
दितिजारये । दिवोदासवरदाय नमः । २००

ॐ दिव्यलोकगाय नमः । दशबाहवे । दीनदैन्यमोचकाय । दीननायकाय ।
प्रमाणप्रत्ययातीताय । परमेशाय । पुराणकृते । पद्मपतये ।
पद्महस्ताय । पन्नगाशनवाहनाय । पन्नगेशाय । पन्नगजाय ।
पन्नगाभरणोज्ज्वलाय । पार्वतीतनयाय । पार्वतीनाथप्रपूजिताय ।
ज्ञानाय । ज्ञानात्मकाय । ज्ञेयाय । ज्ञानदाय । ज्ञानविग्रहाय नमः । २२०

ॐ ज्ञानाम्बातनयाय नमः । ज्ञानशक्तीशाय । ज्ञानशास्त्रकृते ।
ज्ञानकर्त्रे । ज्ञानभर्त्रे । ज्ञानिने । ज्ञानसुरक्षकाय । धर्माय ।
धर्मप्रदाय । धर्मराजाय । धर्मप्रपूजिताय । धर्मवाहाय ।
धर्मबाहवे । धर्मोष्ठाय । धर्मपालकाय । धर्मकर्त्रे ।
धर्मधर्त्रे । धर्मभर्त्रे । धनप्रदाय । यशस्कराय नमः । २४०

ॐ योगगम्याय नमः । योगमार्गप्रकाशकाय । योगदाय । योगिनीनाथाय ।
योगशान्तिप्रदायकाय । योगकर्त्रे । योगधर्त्रे । योगभूमिप्रपालकाय ।
योगविघ्नप्रशमनाय । योगसिद्धिप्रदायकाय । मेधाप्रदाय ।
मायिकेशाय । मेधेशाय । मुक्तिदायकाय । मायिने । माधवसम्पूज्याय ।
माधवाय । माधवात्मजाय । मन्दाकिनीतीरवासिने । मणिकर्णिगणेश्वराय नमः ।
२६०

ॐ धनदाय नमः । धान्यदाय । धीराय । धैर्यदाय । धरणीधराय ।
धर्मपुत्राय । धर्मतुष्टाय । धर्मपुत्रेप्सितप्रदाय । धर्मपुत्राय
(२) धर्मदात्रे । धर्मपुत्रार्थदायकाय । धर्मव्याधज्ञानदात्रे ।

धर्मव्याधेप्सितप्रदाय । दत्तप्रियाय । दानपराय ।
दत्तात्रेयेष्टदायकाय । दत्तात्रेययोगदात्रे । दत्तात्रेयहृदिस्थिताय ।
दाक्षायणीसुताय । दक्षवरदाय नमः । २८०

ॐ दक्षमुक्तिदाय नमः । दक्षराजरोगहराय । दक्षराजेप्सितप्रदाय ।
हंसाय । हस्तिपिशाचीशाय । हादिविद्यासुतोषिताय । हरये । हरसुताय ।
हृष्टाय । हर्षदाय । हव्यकव्यभुजे । हुतप्रियाय । हरीशानाय ।
हरीशविधिसेविताय । स्वस्स्वानन्दाय । स्वसंवेद्याय । स्वानन्देशाय ।
स्वयम्प्रभवे । स्वयञ्ज्योतिषे । स्वराड्पूज्याय नमः । ३००

ॐ स्वस्वानन्दप्रदायकाय नमः । स्वात्मारामवराय । स्वर्गाय ।
स्वानन्देशाय (२) स्वधाप्रियाय । स्वसंवेद्याय (२) योगगम्याय (२)
स्वसंवेद्यत्वदायकाय । हय्यङ्गवीनहृदयाय । हिमाचलनिवासकृते ।
हैमवतीशतनयाय । हेमाङ्गदविभूषणाय नमः । ३१२

॥ इति वैनायकतन्त्रे शारदेशत्रिशतीनांआवलिः सम्पूर्णम् ॥

The nAmAvalI from the corresponding stotra consists of more than 300 names, five of which are repeated and marked as (2).
It is expected that OM namaH gets included while reciting each name.

Proofread by PSA Easwaran

*Shri Sharadesha TrishatI Namavali*

pdf was typeset on May 15, 2021

Please send corrections to *sanskrit@cheerful.com*